M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. 1519

Title: Svarajñāna

1519

Incomplete

C Svarajnāna

:	:		: **Title**
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
S/L :	:		: Publisher
1519 :	:	Decorated	: Remarks

6/12/81

श्री

१

श्रीगणेशायनमः ॥ शांते शूद्रे सदाचारे गुरुभक्ते कमानसे दृढचित्ते कृतज्ञे च देयं [illegible]स्वरोदये र
दुष्टे च दुर्जने क्रुद्धे अशांते गुरुलोपके ॥ हीनसत्त्वे दुराचारे स्वरज्ञानं न दीयते ॥ १ ॥ पार्वत्यु
वाच ॥ देवदेव महादेव कृपां कृत्वा ममोपरि ॥ सर्वसिद्धिकरं ज्ञानं कथयस्व मम प्रभो ॥ २ ॥ न तीर
थिं न च नक्षत्रं न वारो ग्रहदेवता ॥ न विष्टिर्न व्यतिपातो विरुधाया स्तथैव च ॥ ४ ॥ कुयोगेऽ
नापि देवेश प्रभवंति कदाचनः ॥ तन्मे कथय देवेश सर्वकामफलप्रदं ॥ ५ ॥ इ ॥ रो ॥ च ॥ शृणुष्वा
त्वं कथितं देवी देहस्थं ज्ञानमुत्तमं ॥ येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥ ६ ॥ स्वरे वेदाश्च शा
स्त्राणि स्वरे गंधर्वमुत्तमं ॥ स्वरे हि नं च दैवज्ञं नाथहीनं च यद्गृहः ॥ ७ ॥ शास्त्रहीनं च यथा नारी
रोहीनं च यथा वपुः ॥ देहमध्ये स्थिता नाड्यो बहुरूपसविस्तरा ॥ ८ ॥ ज्ञातव्याश्च बुधैर्नित्यं स्वरदे
हे ज्ञानहेतवे ॥ ९ ॥ नाभिस्थानकंदोर्ध्वं अंकुरादिव निर्गताः ॥ द्विसप्ततिसहस्राणि देहमध्ये व्य
वस्थिताः ॥ १० ॥ तिर्यगूर्ध्वमधःस्थावायुः देहसमंततः ॥ चक्रवत्सुस्थिता देहे सर्वप्राणसमाश्रिता

॥ ११ ॥ नासां मध्ये दशश्रेष्ठा दशानां तिस्रयोत्तमाः ॥ इडा च पिंगला चैव सुषुम्ना च तृतीयका ॥ १२ ॥
इडा वामे च विज्ञेया दक्षिणे पिंगला स्मृता ॥ इडायां संस्थितश्चंद्रो पिंगलायां तु भास्कर ॥ १३ ॥
त्रिणं वामे त्रिणं दक्षे सदा वहति मारुतः ॥ सुषुम्ना सा च विज्ञेया सर्वकार्यहरा स्मृता ॥ १४ ॥
तस्य नाड्या स्थितो वह्निर्ज्वलंति कालरूपिणी ॥ विषवं तं विजानीयात् सर्वकार्यविनाशिनी ॥ १५ ॥
वामे अमृतरूपं स्यात् जगदाप्यायकं स्थिरा ॥ दक्षिणे च रभागेन जगदोत्पादये सदा ॥ १६ ॥ म
ध्ये मा भवति क्रूरा दुष्टा सर्वत्र कर्मसु ॥ सर्वत्र शुभकार्येषु वामा भवति सिद्धिदा ॥ १७ ॥ चंद्रो
समस्तु विज्ञेयो रविस्तु विषमः सदा ॥ चंद्रस्त्री पुरुषः सूर्यो चंद्रो गौरो शितो रविः ॥ १८ ॥ निर्गमे
शुभो वामा प्रवेशे दक्षिणः शुभा ॥ शुभे कार्ये शुभो वामा दक्षिणो क्रूरकर्मसु ॥ १९ ॥ मध्यमा भवति क्रूराः स
र्वकार्यविनाशिनी ॥ स्थिरकर्मण्यलंकारे दूराध्वगमने तथा ॥ २० ॥ शांतिकं पौष्टिकं दानं विद्याहेद्य
रुसंग्रहे ॥ सद्धामि दर्शने मैत्रे वाणिज्ये धनसंग्रहे ॥ २१ ॥ गृहप्रवेशे सेवायां [illegible]ध्ये वैवीजवापने ॥ ग्रहदेव

श्रो०

१

प्रतिष्ठायां दीक्षायां मंत्रसाधने ॥२२॥ विद्यारंभेषु सर्वेषु बांधवानां च दर्शने ॥ ज्ञानमोक्षे च बंधे च रससाध
नकर्मणि ॥२३॥ कलाविज्ञानसेवायां स्थिरकर्माणि यानि च ॥ उद्यानेष्वर्थग्रसं देवापीकूपतडागयो ॥२४॥ सर्वक
र्माणि सिध्यंति दिवा रात्रिगतानि च ॥ गीतवाद्यादिकं यत्तन्निखिलं स्याद्यनेन तथा ॥२५॥ आर्त्ति शौर्य्य देवि
विवादे च ज्वरीते व्याधितेषु च ॥ सर्वेषु क्षुद्रकार्येषु चंद्रचारः प्रशस्यते ॥२६॥ शस्त्राभ्यासे विवादे च द्यूते
खेटक चौर्यके ॥ वाहने गजवाज्यादि रथयंत्रादिसाधने ॥२७॥ लिपलेखनगीतादौ यंत्रमंत्रादिसाधने
आयुधे मैथुने वस्त्रे विषभूतादिसंग्रहे ॥२८॥ दक्षिणे प्रवलो वायुर्हितो भोजनमैथुने ॥ षट्कुहस्ते भवेद्देवि २
ज्वरकालेवरानने ॥२९॥ शयने वाम संगे वा युवत्यालिंगनेपि वा ॥ यः सूर्येण पिवेच्चंद्रं स भवेन्मकरध्वज
॥३०॥ क्रियाविक्रयायुद्धेषु स्नानभोजनमैथुने ॥ व्यवहाराभयं गौमानुनाडी प्रशस्यते ॥३१॥ उच्चाटने सुद्रेच
मारणोच्चाटने तथा ॥ मोहनस्तंभनाद्येषु भूतवैतालसाधने ॥३२॥ खरोष्ट्रमहिषादीनां गजस्वारोहणेन च ॥
समुद्रतरणे चैव महानदीषु च ॥३३॥ क्रूराणि यानि कर्माणि चराणि विविधानि च ॥ तानि सिध्यंति सूर्येण
नात्र कार्या विचारणा ॥३४॥ उभयोरिव संचारो विषवं तं नागव्रुधा ॥ न कुर्यात्तस्मै म्यक्रूरादि तत्सर्वं निष्फलं भ

वेत ॥३५॥ क्रमाते चमंदामैरक्षिणं च स्वार्थकर्मणि ॥ शयनं सूर्यवाहे च कर्तव्यो सर्वदा बुधैः ॥३६॥ जिवि
ते मरणे प्रश्ने लाभालाभौ जयाजयौ ॥ विषवे विपरीतस्यात्स्मरेद्देवी सरं सदा ॥३७॥ दुःस्वरं चिंतनं कुर्या
द्योगाभ्यासादिकर्मसु ॥३८॥ व्यवहारी खलो वादे विषवे याति वंचिका ॥ कुपितास्वामि चौराद्याः स्वर्णेन स्वा
स्यः भयंकरा ॥३९॥ दूरध्याने शुभं स्वछंदो निर्विघ्नो नच सिद्धिदः ॥ प्रवेशकार्ये हेतुतां सूर्यशीघ्रं प्रशस्यते ॥४०॥ वा
मे वा दक्षिणे वापि यत्र संक्रमते शिव ॥ कृत्वा तत्पादमादौ च यात्रा भवति सिद्धिदा ॥४१॥ चंद्रे समपदः कार्यः र
विस्तु विषमः सदा ॥ पूर्णपदं पुरः कृत्य यात्रा भवति सिद्धिदा ॥४२॥ विषवे स्याद्यदा यात्रा मनसापि न चिंतयेत
यात्रा नकृत्वा कोरोतस्य हानिः क्लेशन संशयः ॥४३॥ पूर्वे वामोर्द्धत स्वेदोदक्षीणे चंद्रस्तोदिशि ॥ पृष्ठेरिक्ते विवे
कार्योज्ञातव्यो देसिकैः सदा ॥४४॥ ऊर्द्ध्ववामागतो दूतो ज्ञेयो वामपथस्थित ॥ पृष्ठदक्षिणमध्ये [illegible] सूर्य आगतः
शुभः ॥४५॥ यत्र यत्र समादेशा ज्ञात्वा तस्योदयं बुधैः ॥ तिष्ठेत्सर्वेत्र रे चंद्रे भानुदक्षिणमार्ग्याया
॥४६॥ तस्मात्तत्र नगंतव्यं बुधैः सर्वहिते सुभे ॥ [illegible] चारप्रवाहे तु नगच्छेत्पूर्वमुत्तरं ॥४७॥ परिपंथिम
यं तस्य गतौ सौ न निवर्त्तते ॥ दक्षिना[illegible]चारे तु नगच्छेद्यामपश्चिमे ॥ तत्र स्थतदसंघातो मृत्युरेव न

[illegible] ॥ ५० ॥ शून्य
श्री० नाडीं प्र... [illegible] ॥ योद्धा द्वयकृते प्र या१
श्नपूर्णस्थः प्रथमो जयः ॥ [illegible] र्यो न तु तिनान्यथा ॥ ५१ ॥ [illegible] चार एवाहेतु ज्ञायते
यः समान्तरः ॥ दत्त वामान्य [illegible] र ॥ ५२ ॥ जयमध्ये तु संदेहे नाडीमध्ये तु लक्षते सु
3 षुम्नायां गतः प्राणः समरे शत्रुसं [illegible] भवेच्चारः तादृशं युद्धं संभ्रयेत् ॥ तदा सो जयमाप्नो
ति नात्र कार्या विचारणा ॥ ५४ ॥ यदि सं [illegible] लेतु स्वरो व्याप्तो व तु तत् ॥ तदानीं यीं ज्ञेया विचार
सदेवाः सुरमानवाः ॥ ५५ ॥ यदि संग्रामका [illegible] नाम्ना यदा वहेत् ॥ स्थायिनो विजयं विद्यात् विषुव
स्योदयेपि च ॥ ५६ ॥ रणे हरति शत्रुस्थ [illegible] रोन्तरः ॥ स्थानादविषवं चराभ्यां जायते स्वरेण धावत 3
॥ ५७ ॥ शून्यांगपृष्ठतः कृत्वा जीवो [illegible] जीवांगे घात माप्नोति शून्यांगे रक्षितो सदा ॥ ५८ ॥ द
क्षे नये हुतं वक्रं मस्तके [illegible] रस्थितः [illegible] आतुर... च्छेदूर्णायाति ध्रुवं भवेत् ॥ ५९ ॥ वामाचार तथा दक्ष

प्रवेशेयत्र वातके [illegible] पृच्छते [illegible] तत तस्य सिद्धिर्न संशयः ॥ ६० ॥ विपरीतान्तरं प्रश्ने रिक्तायां पृच्छ
को यदि ॥ विपर्ययं च विज्ञेयं विषमस्यापि संप्रति ॥ ६१ ॥ जीवं कारय यदा धृत्वा जीवान्तु द्वंविलोकयवा ॥
जीवस्थो जीवितं पृच्छेत् तस्य [illegible] स्याज्जीवितं ध्रुवं ॥ ६२ ॥ आदौ शून्यगतो दूतः पश्चात् पूर्णे विशेत् यदि
मूर्च्छितोपि ध्रुवं जीवेत् यद [illegible] परिपृच्छति ॥ ६३ ॥ दक्षिणे न यदा वायुर्दुःस्वरो दक्षिणे रौद्रे वहेत् ॥ तदा जीवति
जीवेसौ चंद्रे समफलं मतं ॥ ६४ ॥ चंद्रस्थाने स्थितो जीवः सूर्यस्थानात्तु पृच्छकः ॥ तदा प्राणविमुक्तोसौ य
दि वैद्यशतैर्वृतः ॥ ६५ ॥ पिंगलायां स्थितो जीवो वामे दूतस्तु पृच्छति ॥ तदापि म्रियते रोगी यदि त्राता महेश्वरः
॥ ६६ ॥ यस्मिन्नंगे चरेज्जीवः तत्रस्थः परिपृच्छति ॥ तदा जीवति जीवोसौ यदि रोगैरुपद्रुतः ॥ ६७ ॥ एवं ज्ञात्वा
तथा तज्ज्ञो लाभालाभौ जयाजयौ ॥ चंद्रसूर्यद्वयामार्गौ ज्ञातव्यं विचक्षणैः ॥ ६८ ॥ आदौ चंद्रः सिते पक्षे भा
स्करस्तु सिते तरे ॥ प्रतिपदादिदिनेत्रीणि स्याः क्रमेणोदयः ॥ ६९ ॥ शुक्लपक्षे भवेद्वामः कृष्णपक्षे तु दक्षिणः ॥ स्वरो० २
ज्ञानीयात्प्रतिपत्पूर्वं योगी तद्गतमानसः ॥ ७० ॥ चंद्रकाले यदा सूर्यः सूर्ये चंद्रोदयो भवेत् ॥ उद्वेगकलहा

श्री० ४ हानिरुक्तं सर्वं निवारयेत् ॥ ७१ ॥ एकैकस्य घटिपंच क्रमेनैवोदयंति च ॥ क्रमादेकैकनाड्यां तु तत्त्वानां पृथु
गुद्भव ॥ ७२ ॥ प्रथमं वहति वायुर्द्वितीये च तथानलं ॥ तृतीये वहति भूमिश्चतुर्थे वारुणं वहेत् ॥ ७३ ॥
अर्द्धोरात्रस्य मध्ये स्यात् ज्ञेया द्वादश संक्रमाः ॥ वृषकर्कटकन्यालि मृगमीना निशाकरे ॥ ७४ ॥ एतेषु उद
ये ज्ञेयो सर्वकार्यप्रसाधका ॥ मेषो सिंहं च धन्वं च तुलायां मिथुने घटे ॥ ७५ ॥ उदये दक्षिणे ज्ञेयः शुभा
शुभविनिर्णयः ॥ गुरुशुक्रबुधेंदूनां वासरे वामनाडिका ॥ ७६ ॥ सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः
॥ ७७ ॥ सूर्योदये यथा चंद्र चंद्रसूर्योदये यदि ॥ अशुभं हानिरुद्वेगं अशुभं सर्वं निवारयेत् ॥ ७८ ॥
वामे वा दक्षिणे वा उदया पंच प्रकीर्तिता ॥ तत्त्वानां नाम विज्ञेयं सिद्धिकामेन योगिनां ॥ ७९ ॥ मध्ये पृ ४
थ्वी अधश्चापः ऊर्द्ध्वं वहति चानलः ॥ तिर्यग्वायुप्रवाहस्य नभो वहति संक्रमे ॥ ८० ॥ ऊर्द्ध्वं वह्निरधश्चा
पस्तीर्णाः मध्यपुटे तथा ॥ नितंवा नभो मध्ये वाथ वातप्रभंजने ॥ ८१ ॥ पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोद श्री० २
यः ॥ हानिमृत्युकरो पुंसां मशुभौ व्योममारुतौ ॥ ऊर्द्ध्वमृत्युरधः शांति तिर्यगुच्चाटने तथा ॥ ८२ ॥ मध्ये स्तं

भविज्ञानियात् ॥ नभसर्वत्रमध्यमं ॥ स्कंधद्वये स्थितो वह्निर्नाभिमूले प्रभंजने ॥ ८३ ॥ जानुदेशे स्थिता
पृथ्वी पादतः सलिलं वहेत् ॥ पृथ्वी स्थिरकर्माणि चलकर्माणि वारुणे ॥ ८४ ॥ तेजस्य समकर्माणि मार
णे चाटने नले । व्योम्नि तत्किंचित्कर्तव्यं अभ्यासेत् योगसेवया ॥ ८५ ॥ शून्यता सर्वकार्येषु संस्मरणं यदे
वसदा ॥ ८५ ॥ पृथ्वीजलाभ्यां सिद्धीस्यान्मृत्युक वह्नौ क्षयोनलौ ॥ नभसो निष्फलं सर्वं ज्ञातव्यं तत्त्ववे
दिभिः ॥ ८६ ॥ चिरं लाभ क्षिति ज्ञेयः तत्क्षणात्तोयतत्त्वतः ॥ हानिस्यात् वह्निवाताभ्यां नभस्यानिष्फलं भवेत् ॥
८७ ॥ कुजो वह्निरविः पृथ्वी शौरी चापः प्रभंजने ॥ आपां मध्ये गतो राहुर्दक्षिणां व्यवस्थिता ॥ ८८
ने चंद्रो बुधः पृथ्वी गुरुर्वातसितोनलः ॥ वामनाड्यां स्थिताः सर्वे सर्वकार्येषु निश्चितं ॥ ८९ ॥
...लाविंदु शुक्रो व...रिविकुजः ॥ वायुराहुः शानव्यो...गुरु रे वप्रकीर्तिता ॥ ९० ॥ ...
...याहास्या धराजले ॥ तेजो वा व्यो...स्वराकं पः प्रवासिता ॥ ९१ ॥ गत...त्वरा का
...कीर्तिता ॥ द्वादशैस्त्रयन्ने नज्ञातव्या देशकौसदा ॥ ९२ ॥ पृथ्वीरापः स्तथा तेजो वायुरा
...त्मके देहे ज्ञातव्यं च वरानने ॥ ९३ ॥ अस्थिमांसं त्वचानाडी रोमं चैव तु पंचमं

हरितं च गुणोपेतं प्रोक्तं ब्रह्म ज्ञानेन भाषितं ॥ ९४ ॥ शुक्लं श्रोणि तथा तत्र जानुस्थलालवर्णं च मं ॥ आपः पं चा
गुणोपेतं ताज्ञातव्यं च विचक्षणैः ॥ ९५ ॥ तत्र धातव्या तथा नाडी कीर्तितं लक्ष्यमेव च ॥ तेजः पं च गुणोपेतं ताज्ञात
श्री० व्यं योगिभिः सदा ॥ ९६ ॥ धावनं वल्कनं गंधं संकोचं प्रसरणं तथा ॥ वायुः पं च गुणोपेतं प्रोक्तं ब्रह्म ज्ञानेन भाषि
तं ॥ ९७ ॥ रागद्वेष तथा लज्जा भय मोह स्यपं च मं ॥ नभः पं च गुणोपेतं प्रोक्तं ब्रह्म ज्ञानेन भाषितं ॥ ९८ ॥ पीतं
५ चैव चतुः कोणं मध्यं मध्यमाश्रितं ॥ भोगदं पार्थिवं तत्वं प्रवाहे द्वादशांगुलं ॥ ९९ ॥ श्वेतं स्यादर्धचन्द्राभं
देवत्वाय मधः वहं ॥ लाभः कृष्णं तत्वं प्रवाहे षोडशांगुलं ॥ १०० ॥ रक्तं त्रिकोणं तत्र स्यात् ऊर्ध्वमा
श्री र्गप्रवाहकं ॥ दीप्तं तैजसं तत्वं प्रवाहे चतुरांगुलं ॥ १०१ ॥ नीलं मध्ये बिंदु संकाशं स्याद् ह्रस्वं तिर्यग्गाश्रितं ॥ चप
लत्वं मारुतं तत्वं प्रवाहे चाष्टांगुलं ॥ १०२ ॥ वर्णाकारं स्वादवातं अव्यक्तं सर्वगामिनः ॥ मोक्षदं नभसं तत्वं ५
चं सर्वकार्येषु निष्फलं ॥ १०३ ॥ पूर्वापश्चिमे याम्ये उत्तरायां यथाक्रमं ॥ पृथिव्यादि भूतानि वलीष्ठानि विदि
निर्दिशेत् ॥ १०४ ॥ मेषसंक्रांति वेलायां स्वर भेदं तत्र लक्षयेत् ॥ संवत्सर फलं ब्रूयात लोकानां तत्वचिंतकैः
॥ १०५ ॥ शुक्ल प्रतिपदं चैव प्रातस्तत्र विभेदतः ॥ दक्षिणे च तु रणं योगी दक्षिणे उत्तरायणे ॥ १०६ ॥ लभेत्